# Shri Shivaguru Stotram

# શ્રીશિવગુરુસ્તોત્રમ્

## Document Information

Text title : Shri Shivaguru Stotram 2

File name : shivagurustotram2.itx

Category : shiva, shrIdharasvAmI, stotra

Location : doc_shiva

Author : Shridharasvami

Proofread by : Manish Gavkar

Description/comments : shrIdharasvAmI stotraratnamAlikA

Latest update : February 11, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 12, 2023

*sanskritdocuments.org*

Shri Shivaguru Stotram

# શ્રીશિવગુરુસ્તોત્રમ્

(અનુષ્ટુપ્છન્દઃ)

અહમસ્મિ સદા ભામિ કદાચિન્નાહમપ્રિયઃ ।
યદેવં પ્રસ્ફુટં સ્વેન તં શિવં પ્રણતોઽસ્મ્યહમ્ ॥ ૧॥

અમદર્થં ન હિ પ્રેયો મદર્થં સમ દેવ હિ ।
પરપ્રેમાસ્પદં યદ્ધિ તં શિવં પ્રણતોઽસ્મ્યહમ્ ॥ ૨॥

પરપ્રેમાસ્પદત્વાદ્વા યોઽવિનાશઃ સ્વભાવતઃ ।
આનન્દં બ્રહ્મ ચાત્મેતિ તં શિવં પ્રણતોઽસ્મ્યહમ્ ॥ ૩॥

જાગ્રત્સ્વપ્નસુષુપ્તીનાં સાક્ષ્યતો યદતદ્દૃશમ્ ।
અવસ્થાત્રયનિર્મુક્તં તં શિવં પ્રણતોઽસ્મ્યહમ્ ॥ ૪॥

યસ્માત્પરતરં નાસ્તિ નેતિ નેતિ શ્રુતિર્જગૌ ।
ભાસા યસ્ય જગદ્ભાતિ તં શિવં પ્રણતોઽસ્મ્યહમ્ ॥ ૫॥

આભારૂપસ્ય વિશ્વસ્ય ભાનં ભાસાં નિધેર્વિના ।
નૈવ કલ્પેત ભારૂપં તં શિવં પ્રણતોઽસ્મ્યહમ્ ॥ ૬॥

ચિદ્વિવર્તં શ્રુતિર્બ્રૂતે કારણં જગતોઽસ્ય યત્ ।
ચિદ્રૂપં બ્રહ્મ ચાત્રેતિ તં શિવં પ્રણતોઽસ્મ્યહમ્ ॥ ૭॥

યસ્મિન્નાભાતિ સર્વં યજ્જગદ્ગન્ધર્વપત્તનમ્ ।
ચિદાકાશં તમાત્માનં શ્રીશિવં પ્રણતોઽસ્મ્યહમ્ ॥ ૮॥

યતશ્ચેમાનિ ભૂતાનિ જાયન્તે પરમાત્મનઃ ।
સ્થિત્વા યસ્મિન્ લયં યાન્તિ તં શિવં પ્રણતોઽસ્મ્યહમ્ ॥ ૯॥

જગતઃ સ્થિતિનાશાભ્યાં યચ્ચ કિઞ્ચિન્ન હીયતે ।
સદ્રૂપં બ્રહ્મ ચાત્મેતિ તં શિવં પ્રણતોઽસ્મ્યહમ્ ॥ ૧૦॥

માયામેઘો જગન્નીરં વર્ષત્વેષ યથા તથા ।

સચ્ચિદંશસ્વરૂપં તં શ્રીશિવં પ્રણતોઽસ્મ્યહમ્ ॥ ૧૧॥

યત્કૃપાલેશતઃ સર્વા દૈવી સમ્પત્પ્રજાયતે ।
બ્રહ્મભૂમાદિનામાનં તં શિવં પ્રણતોઽસ્મ્યહમ્ ॥ ૧૨॥

નમસ્ત્વૈક્યં શ્રુતિર્વક્તિ યતઃ સ્વાત્મપ્રસિદ્ધયે ।
સોઽહં બુદ્ધ્યા તમાત્માનં શ્રીશિવં પ્રણતોઽસ્મ્યહમ્ ॥ ૧૩॥

મનસા વચસા ગ્રાહ્યં ચાપરોક્ષાત્સ્વમાત્રકમ્ ।
અહંસ્ફૂર્તેઃ પરં ભાન્તં તં શિવં પ્રણતોઽસ્મ્યહમ્ ॥ ૧૪॥

યત્ર નાસન્નસદ્રૂપે નાહઙ્કારો ન સંસૃતિઃ ।
કેવલં ચિત્સુખં યચ્ચ તં શિવં પ્રણતોઽસ્મ્યહમ્ ॥ ૧૫॥

સાલમ્બં હિ પરિત્યજ્ય નિરાલમ્બં સમાશ્રયેત્ ।
આદૃત્યેમં શ્રુતેઃ પક્ષં તં શિવં પ્રણતોઽસ્મ્યહમ્ ॥ ૧૬॥

પરોક્ષતાપરિચ્છેદશાબલ્યાઽપોહ્યનિર્મલમ્ ।
તદસીતિ ગિરા લક્ષ્યં તં શિવં પ્રણતોઽસ્મ્યહમ્ ॥ ૧૭॥

(વસન્તતિલકવૃત્તમ્)
ચિદ્વલ્કલામ્બરધરં પરમેકમાદ્યં
આનન્દસાન્દ્રમમલં નિજબોધમાત્રમ્ ।
બ્રહ્મૈવ શાશ્વતમિહાસ્તિ વિબોધયન્તં
શ્રી સદ્ગુરું પરશિવં સતતં નમામિ ॥ ૧૮॥

(શાર્દૂલવિક્રીડિતવૃત્તમ્)
રજ્જૌ સર્પ ઇવાસ્તિ યસ્ય નિલયે જીવેશભાનં ચ યત્
સમ્પૂર્ણં ચિદિહાસ્તિ નૈવમિતરદ્ધાનં ચ નાહં યતઃ ।
આનન્દે પરમે મઠે સુવિમલે સ્વસ્થં પરં યન્મહઃ
તસ્મૈ શ્રી ગુરુમૂર્તયે નમ ઇતિ સ્વૈક્યં સદૈવાસ્તુ મે ॥ ૧૯॥

(વસન્તતિલકવૃત્તમ્)
અબ્ધેર્યથા ન ખલુ ભાતિ વિભિન્નમેતત્
ડિણ્ડીરબુદ્બુદતરઙ્ગજલં તથૈવ ।
જીવેશ્વરૌ જગદિદં ન વિભિન્નમસ્માત્
તેનૈવ પૂર્ણમમલં નિજબોધમાત્રમ્ ॥ ૨૦॥

નિર્ભિન્નભિન્નમપિ યત્ર ન વસ્તુ કિઞ્ચિત્

યસ્મિન્ન વિશ્વમખિલં ન મનો વચાંસિ ।
મૌનં પરં ભવતિ યચ્ચ સુખૈકમાદ્યં
તં શ્રીશિવં ગુરુવરં સતતં નમામિ ॥ ૨૧॥

સ્તોત્રં ત્વિદં પઠતિ નિત્યમનન્યભક્ત્યા
સેવાં સદા પરિચરન્ગુરુસન્નિધૌ યઃ ।
તસ્મૈ દદાતિ વિમલં પરમાત્મરૂપં
સ્વીયં સદા સુખઘનં શિવસદ્ગુરુર્નઃ ॥ ૨૨॥

ભક્તાઃ પઠન્તુ નિખિલા વિમલં યશશ્ચ
શ્રુત્યોદિતં વિગતમોહભવોહિ યસ્માત્ ।
બ્રહ્મૈવ શાશ્વતમહં ન ચ વસ્તુજાતં
મત્વા ન શોચતિ ગુરું શરણં પ્રપન્નઃ ॥ ૨૩॥

ઇતિ શ્રીમત્ પરમહંસપરિવ્રાજકાચાર્ય સદ્ગુરુ ભગવાન્
શ્રીધરસ્વામીમહારાજવિરચિતં શ્રીશિવગુરુસ્તોત્રં સમ્પૂર્ણમ્ ।
સંસ્કૃત વાઙ્મયે પ્રાથમિકોઽયં સ્તવઃ ।
રચના સ્થલં - શ્રીક્ષેત્ર સજ્જનગિરિ ચૈત્ર ૧૯૩૬
In some prints the following are added
મૃત્યોઃ સ મૃત્યુમાપ્નોનિ યસ્તુ નાનેવ પશ્યતિ ।
શ્રુતિબ્રૂતે યતસ્તસ્માત્ તં શિવં પ્રણતોઽસ્મ્યહમ્ ॥ ૧૩॥

નમસ્ત્વેક્યં શ્રુતિવક્ તિ યતઃસ્વાત્મપ્રસિદ્ધયે ।
સોહં બુધ્યા તમાત્માનં તં શિવં પ્રણતોઽસ્મ્યહમ્ ॥ ૧૪॥

Proofread by Manish Gavkar

*Shri Shivaguru Stotram*

pdf was typeset on February 12, 2023

Please send corrections to *sanskrit@cheerful.com*